अट्टिटिषा (aṭṭiṭiṣā) *f.* 1 desire to kill कोऽपि नाड्डिषिदट्टिटिषायाम् DvyāśraKā. 8.28 (comm. हिंसेच्छायाम्); 2 desire to transgress or override, DvyāśraKā. 8.28 (comm. अतिक्रमेच्छायाम्)

अट्टितुम् (aṭṭi-tum) *inf.* to set out (for victory) सारोऽसिण्डौकित-धनुर्विश्वमट्टितुमड्डुति DvyāśraKā. 1.125 (comm. अट्टितुं हिण्डितुं विजययात्रां कर्तुमित्यर्थः)

अट्टिलिका (aṭṭilikā) *f.* name of a town पुरीमट्टिलिकां जातु स प्रयातोऽन्तिकस्थितैः । अपैः प्रैर्यत कल्हाद्यैर्मार्गोच्छेदाय भूपतिः RājTa.(Ka.) 8.581.

अट्टिलिकापण (aṭṭilikāpaṇa) *m.* market of the town Aṭṭilikā जहार तुरगांलुण्ठि चकाराट्टिलिकापणे । मार्गद्रङ्गादिभङ्गं च···सर्वत्र सोऽकरोत् RājTa.(Ka.) 8.1991.

अट्टेश्वर (aṭṭeśvara) *m.* name of an eagle कूटशाल्यामपि द्वौ सुपर्णिनावट्टेश्वरश्चडेश्वरश्च GiMs. iii(1). 260.19.

अट्णार (aṭṇārá) *m.* name of Para's father (one of the kings of Kośala) अभिजिद्तिरात्रस्तेन ह पुर आट्णार ईजे कौसल्यो राजा तदेतद्गाथयाभिगीतमट्णारस्य परः पुत्रोऽश्वं मेध्यमबध्नयत् S'atBr. XIII. v. 4.4.

अट्त्वाभाव (atvābhāva) *m.* absence of being one of the letters represented by the *pratyāhāra aṭ* लस्याट्त्वाभावादप्राप्तं छत्वम् Prasā. i. 90.18.

अट्य (a-ṭya) *adj.* other than the suffix *ṭya* (*ya*) येऽनोऽट्ये S'ākaṭāVyā. ii. 3.61 (comm. अनित्येतदन्तस्य ट्यवर्जिते ये प्रत्ययेऽन्त्याजादेर्लुग्न भवति । सामन्यः । वेमन्यः); SiddhaHe. vii. 4.51.

अट्या (aṭyā) *f.* wandering, roaming about मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः । तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ManuSm. 7.47; अट्यया च सः । विद्याभूत्यान् क्वचित्पश्यन्मेने चर्याफलं महत् DvyāśraKā. 13.8 (comm. अट्यया भ्रमणेन); परिव्रज्या व्रतादानं व्रज्याट्या च गतिः स्मृता AbhidhāRaMā. 4.91; Liṅgānu.(He.) 36.8;

अट्यादि (aṭyādi) *adj.* the root *aṭ-* and others अट्याद्येकाज्झलादिभ्योऽरुचिशुभिभ्यां भृशाभीक्ष्ण्ये यङ् S'ākaṭāVyā. iv. 1.10.

अठ् (aṭh-) I. U. to go अठि (अठ) गतौ DhātuPā. 1.280; अनन्तरं अठ गताविति कश्चित् पठ्यते । मैत्रेयादयस्तु न पठन्ति । अठतीत्यादि DhātuVr. 1.334.

अठ (aṭha) *ind.* a threatening interjection अठावाडां स्वरादयः GaṇRa. 1.9(23); अठ, अव, अड इत्येते भर्त्सने । अठ करोतीत्यादि GaṇRa. 1.9(24)

अठच् (aṭhac) (Gr.) the suffix *aṭha* कर्मणि घटोऽठच् (कर्मणि घटते कर्मठः पुरुषः) P. v. 2.35; CāndraVyā. iv. 2.36; SaraKāṇṭhā. (Gr.) ii. 2.114; v. 2.52; यथा कर्मणि घटोऽठच् । इत्यठजन्तस्य निमित्तम्, न ठ इति कर्मठ इत्यत्रेकादेशो न भवति Pradī. iv. 199A. 30 (*on* iv. 3.15); LaS'abdeS'e. ii. 224.8.

अठताल (aṭha-tāla) *m.* name of a musical measure (of time) अठतालेन संयुक्तमठतालं प्रचक्षते CaturDa. 3.106.

अठतालक (aṭhatāla-ka) *m.* name of a musical measure (of time) चतुर्दशाक्षरी कालो जातस्तेनाठतालकः CaturDa. 3.108.

अठसुआ (aṭhasuā) name of a village in Unāvisa Pattalā श्रीमज्जयचंद्रदेवो विजयी । उनाविसपत्तलायां । सपाटकअर्हेंती – ग्राम – सरसा – ग्राम – अठसुआ – ग्राम निवासिनः EI. iv. 124.20.

अठि (aṭhi) (Gr.) the root *aṇṭh-* अठि गतौ DhātuPā. 1.280.

अठिद् (aṭhida) *m.* [pl.] name of a people [PW, pw, MW]

अठिल्ला (aṭhillā) *f.* Sanskritized name of a Prakrit metre *adillā* [PW, pw, MW, APTE]

अठी (a-ṭhī) *f.* other than the perfect endings [MugdhaBo. 8.2] वेमुदित् ··· निष्कुषोऽखसो रुदुसुनोत्स्वठ्याः MugdhaBo. 8.46 (86.4); 8.100 (95.6); गुरस्यठ्याम् MugdhaBo. 9.29 (107.9); 16.4 (121.16).

अठ्ठ (aṭhṭha) *m.* tower प्राकाराट्ठप्रतोलीभिः ··· विराजमाना सर्वत्र (अयोध्या नाम पुरी आसीत्) NaraP. 25.5 cf. **अट्ट**.

अठ्यच् (a-ṭhyac) (Gr.) a vowel not belonging to the perfect endings नुण् रधो मुवां नशमस्जो रभलभोऽनठीमच्यृ ए त्तस्य अरठ्यचि MugdhaBo. 11.4 (114.7) (Vṛtti रभलभोरठीवर्जेऽचि नुण् स्यात् । अरन्धत् । रधिता)

अड् (aḍ-) I. P. [अड उद्यमे DhātuPā. 1.389; DhātuPra. i. 359 (31.25); DhātuPā.(C.) 1.131; DhātuVr. 1.357] to endeavour, to exert, to attempt विशेषेणाडत्युद्यमं करोतीति व्याडिः Prasā. i. 814.14.

अड् (aḍ-) (Gr.) an artificial term meaning 'in the middle of a metrical foot' pādamardhīya (? pādamadhyīya) घान्तोऽडि विसर्जनीयं यवोहिषु ṚTPrāti. 112 (comm. दीर्घात्परो नकारः पादमर्धीये प्रत्यये विसर्जनीयमापद्यते यवोहिषु प्रत्ययेषु); अडि ṚTPrāti. 143 (comm. पादमर्धीये विसर्जनीयः सकारमापद्यते); अट्पादाद्द्रयाः Sāmatantra. i. 10.1.

अड् (aḍ) (Gr.) a primary suffix *-a* applied to roots ending in *ā* आतोऽड्वावामोऽड् S'ākaṭāVyā. iv. 3.113 (comm. कर्मणः परात् ह्वावामावर्जितादाकारान्तादनुपसर्गाद्धातोरड् डित्कारः प्रत्ययो भवति = क P. iii. 2.3 (गोदः); आख्य इति आङ्पूर्वस्य ख्यातेरडि सिद्धिः SyādvāMañ. 29 (45); a secondary suffix *-a* पुत्रेऽड्डे मातुः कचोऽड् S'ākaṭāVyā. i. 2.126 = मातच् Vār. *on* P. vi. 1.14; अधिकमस्मिन् शतसहस्रे तत्संख्यं शतिशद्शान्तदड् S'ākaṭāVyā. iii. 3.75 = ड P. v. 2.45.

अड (aḍa) *m.* 1 sting of a scorpion अडः वृश्चिकलाङ्गूलम्, तेन च तैक्ष्ण्यं लक्ष्यते PadMañ. on KāśiVr. *on* P. ii. 4.21; 2 effort, exertion (उद्यम), S'ābdaRaSaK. 96.1.

अड (aḍa) (Gr.) a secondary suffix अडच् वोपादेः JaineVyā. iv. 1.136; अनुकम्पित उपेन्द्रदत्त उपडः JaineVyā. 263.13 (*on* iv. 1.136) = अडच् P. v. 3.80; वोपादेरडाकौ च SiddhaHe. vii. 3.36.

अडक (aḍaka) *m.* ram, MadaPāNi. 74.22.

अडकवती (aḍakavatī) *f.* name of the capital of the Yakṣas अडकवतीनिवासी दशभूमीश्वरो महावज्रधरः ··· आर्यमैत्रेयादिमहाबोधिसत्त्वगणमेवमित्याद्याहेति पूर्वाचार्याः AbhisaAlañĀ. 6.10.

अडक्षीणम् (aḍakṣīṇam) *adv.* [*w.r.* for अपडक्षीणम्] in secret, in seclusion, comm. *on* YaśasCam. ii. 164.13.

अडगौं (aḍagauṃ) *n.* name of a village (Kheṭaka) EI. xxv. 211.35.

अडच् (aḍac) (Gr.) a secondary suffix *aḍá* प्राचामुपादेरडज्वुचौ च P. v. 3.80 (उपडः); अडच् वुच् घन् इलच् ठच् क एते प्रत्ययाः Prasā. i. 931.12.

अडड (aḍaḍa) *n.* (Jain.) a large measure of time चतुरशीत्यडडाङ्गशतसहस्राण्येकमडडम् [JainL.]

अडडाङ्ग (aḍaḍāṅga) *n.* (Jain.) a measure of time made of a large number of *truṭitas* चतुरशीतिमहात्रुटितशतसहस्राण्येकमडडाङ्गम् [JainL.]

अडण्ढण (a-ḍaṇḍhaṇa) *adj.* not fickle, firm कः ··· अटौठोडडण्ढणः SaraKaṇṭhā. 267.8 (comm. अटाः सुभटास्तानोठते बाधते इति क्विप् । तेषामीडीश्वरः । अडण्ढणोऽचपलः । डण्ढणः इत्यव्युत्पन्नं चपलवाचि प्रातिपदिकम्)

अडताल (aḍa-tāla) *m.* name of a musical *tāla* मकरन्दः परो ज्ञेय अडतालश्च षड्विंधः S'ārṅgaPa. 2016; 1964.

अडताली (aḍa-tālī) *f.* one of the 120 Deśitālas अड्डुताली (v. l. अडताली) दो लघुद्वयम् SaṁgīRa. iii. 158.3 (5.305)

अडतिरिक्त (aḍ-atirikta) *adj.* other than the Pratyāhāra *aṭ* 'आदर्शेन' इत्यादौ तु नातिप्रसङ्गः, अडतिरिक्तव्यवायात् LaS'abdeS'e. i. 190.8.

अडन्तर (aḍantara) *m.n.* a type of *nṛtta* (dance) पुरतोऽपिहितौ पादौ डाण्टुरेवाप्यनन्तरः (? अडन्तरः) NṛttaSaṁ. 286; अडादस्य पदद्वन्द्वं संयोज्य निपतेद्भुवि । अडन्तरमिति प्रोक्तं कोहलेन महात्मना [Bharatakośa 9B.36]

अडन्तर (aḍ-antara) *adj.* separated by the augment *a* तथोपसर्गात् सुनोति सुवति स्यति स्तौति स्तोभतीनाम् अडन्तरोऽपि । अभिषुणोति KātanVr. iii. 8.26.

अडभाव (aḍ-abhāva) *m.* absence of the augment *a* सत् विद्यमानम् जायत समुत्पन्नम् । अडभावः छान्दसः ChāndoUBh. 344.6 (*on* vi. 2.1); 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः Prasā. ii. 705.19.

अडमरीकृत (a-ḍamarīkṛta) *adj.* not made tumultuous (rendered free from disturbance or revolt) अडमरीकृतदिग्वलयः EI. xii. 275.32.

अडम्बर (a-ḍambara) *adj.* without disturbance, silent, peaceful जागर्ति योगनिद्रालुर्यावद्विश्वमडम्बरः (रामः) RāmC. 9.34.

अडयार (aḍayāra) *m.* name of a village EI. xxiii. 202.8.

अडर्क (aḍarka) *m.* name of a king अलर्कः (v. l. अडर्कः) कक्षसेनश्च MahāBhā. ii. 8.17.

अडविमुष्टूरु (aḍavimuṣṭūru) *m.* name of a village, EI. vii. 83.67.

अडशियमणवाल (aḍaśiyamaṇavāla) *m.* name of a Brahmin, EI. v. 86.169.

अडागम (aḍ-āgama) *m.* the augment *a* आख्यानावयवभूतायाः प्रकृतेरडागमादिकार्यं यथा स्यात् Nyās. i. 516.4 (*on* iii. 1.26); अडागमयुक्तोऽपि आतिदेशिकः Pradī. v. 136A.4 (*on* vi. 1.135); अगम इति छान्दसेनाडागमेन Loc. 27.17 (*on* 1.5); पञ्चमलकारत्वस्य चाडागमादिचिह्नाभावेनानिश्चयात् NyāySu. (So.) 78.15 (*on* i. 2.22); अडागमस्तु लुङादिविशेषापेक्षत्वाद् बहिरङ्ग इति पूर्वं लादेशे विकरणश्च प्राप्नोति अडागमश्च PadMañ. *on* KāśiVr. *on* P. i. 3.17; न चाडागमप्रवृत्तिकाले नित्यो विकरणः शक्यते प्रवर्तयितुम् । पूर्वमेव नियमेनापसारितत्वात् PariVr.(Sī.) 40.11; 178.5; पश्यतेत्वडागमाभावः (छान्दसः) S'ivārkaMaDī. i. 161.10 (*on* i. 1.3); i. 231.12 (*on* i. 1.17); अत्राडागमस्तु आगम-